क्रोधाद्यनुभावकत्वेऽपि भीमसेनवक्तृत्वेनोद्धता वचनादय:। वाच्यौचित्याद्यथोदाहृते। मूर्द्ध-व्याधूयमानेत्यादौ ॥ * ॥ प्रबन्धौचित्याद्यथा। नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घ-समासादय:। एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादय:। कथायां रौद्रेऽपि नात्यन्त-मुद्धता:। एवमन्यदपि ज्ञेयम्। इति साहित्य-दर्पणे रीतिविवेको नाम ९ परिच्छेद: ॥ * ॥ अगस्त्यपत्नी। इति शब्दरत्नावली ॥ दमयन्ती। यथा,—

"वैदर्भी विपुलानुरागकलना सौभाग्यमत्रा-
खिल-
क्षौणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमै:।
किञ्चाकाकनरेन्द्रभूसुभगता संभूतये लम्भकं
देवेन्द्रावरजप्रसादितशचीविश्राणिताशीर्ब्बच:॥"
इति उत्तरनैषधे १५ सर्ग: ॥

रुक्मिणी। यथा,—
"वैदर्भ्या: स तु सन्देशं निशम्य यदुनन्दन:।
प्रगृह्य पाणिना पाणिं प्रहसन् द्विजमब्रवीत् ॥"
इति श्रीभागवते १० स्कन्धे ५३ अध्याय: ॥

वैदलं, क्ली, भिक्षुकस्य त्वक्मयादिपात्रम्। यथा,
"पात्रन्तु दारवालाबुत्वङ्मयान्यपि वैदलम् ।"
इति जटाधर: ॥

वैदल:, पुं, ( विदलो दालिस्तस्मात् जात:। विदल + अण्। ) पिष्टक:। यथा,—
"पूपोऽपूप: पिष्टक: स्याद्वैदलो विदलोऽपि च।"
इति शब्दचन्द्रिका ॥
विदलो दालिस्तन्निर्म्मितपिष्टको वैदल:। तद्-गुणा:।
"वैदला गुरवो भक्ष्या विष्टम्भिद्दृष्टमारुता: ॥"
इति राजवल्लभ: ॥

वैदिक:, पुं, ( वेदं जानातीति। वेद + ठञ्। ) वेदज्ञब्राह्मण:। वेदोक्ते, त्रि। यथा, तन्त्रसारे।
"वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगत: ॥"

वैदिशं, त्रि, विदिशाया अदूरभवं नगरम्। इति सिद्धान्तकौमुदी ॥

वैदुष्यं, क्ली, ( विदुष: कर्म्म भावो वा। विद्वस् + ष्यञ्। ) विदुषो भाव:। विद्वस्शब्दात् ष्यञ्-प्रत्ययेन निष्पन्नमिदम् ॥ ( यथा, राजतरङ्गि-ण्याम्। १। १२।
"पाटवं दृष्टवैदुष्यतीव्रा सुव्रतभारती ॥")

वैदूर्य्यं, क्ली, ( विदूरात् प्रभवतीति। विदूर + "विदूरात् ञ्य:।" ४। ३। ८४। इति ञ्य:। ) मणिविशेष:। स तु श्यामपीतवर्ण:। लहसुनीया इति हिन्दी भाषा। अस्य देवता केतु:। तत्पर्य्याय:। बालवायजम् २। इति हेमचन्द्र: ॥ केतुरत्नम् ३ केतवम् ४ प्रावृष्यम् ५ अभ्र-रोहम् ६ खराब्दाङ्कुरकम् ७ विदूररत्नम् ८ विदूरजम् ९। अस्य गुणा:। अम्लत्वम्। उष्ण-त्वम्। कफवायुनाशित्वम्। गुल्मशूलप्रशमन-त्वम्। भूषितश्चेत् शुभावहत्वञ्च। इति राज-निर्घण्ट: ॥ अपि च।

"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम्।
मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्।
चाक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम् ॥"
इति राजवल्लभ: ॥ * ॥

तच्छायलक्षणं यथा,—
"एकं वेणुपलाशकोमलरुचा मायूरकण्ठत्विषा
मार्जारेक्षणपिङ्गलच्छविजुषा ज्ञेयं त्रिधा
च्छायया।
यद्गात्रं गुरुतां दधाति नितरां स्निग्धन्तु
दोषोज्झितं
वैदूर्य्यं विशदं वदन्ति सुधिय: स्वच्छञ्च तच्छो-
भनम् ॥"

तस्य कुलक्षणं यथा,—
"विच्छायं मृच्छिलागर्भं लघु रूक्षञ्च सक्षतम्।
सत्रासं परुषं कृष्णं वैदूर्य्यं दूरतो नयेत् ॥"

तत्परीक्षा यथा,—
"घृष्टं यदात्मना स्वच्छं स्वच्छायां निकषाश्मनि।
स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यमुच्यते ॥"
इति राजनिर्घण्ट: ॥ * ॥

सूत उवाच।
"वैदूर्य्यपुष्परागाणां कर्क्केतभीष्मके वदे।
परीक्षां लक्षणा प्रोक्तां व्यासेन कथितां द्विज ॥
कल्पान्तकालक्षुभिताम्बुराशि-
निर्ह्रादकल्पाद्दितिजस्य नादात्।
वैदूर्य्यमुत्पन्नमनेकवर्णं
शोभाभिरामं द्युतिवर्णबीजम् ॥
अविदूरे वैदूर्य्यस्य गिरेस्तुङ्गरोधस:।
कामभूतिकसीमानमनु तस्याकरोऽभवत् ॥
तस्य नादसमुत्थत्वादाकर: सुमहागुण:।
अभूदुत्तरितो लोके लोकत्रयविभूषण: ॥
तस्यैव दानवपतेर्निनदानुरूप-
प्रावृट्पयोदवरदर्शितचारुरूपा:।
वैदूर्य्यरत्नमणयो विविधावभासा-
स्तस्मात् स्फुलिङ्गनिवहा इव सम्बभूवु: ॥
पद्मरागमुपादाय मणिवर्णा हि ये क्षितौ।
सर्व्वांस्तान् वर्णशोभाभिर्वैदूर्य्यमनुगच्छति ॥
तेषां प्रधानं शिखिकण्ठनीलं
यद्वा भवेद्वेणुदलप्रकाशम्।
चाषाग्रपक्षप्रतिमश्रियो ये
न ते प्रशस्ता मणिशास्त्रविद्भि: ॥
गुणवान् वैदूर्य्यमणिर्योजयति स्वामिनं वरभाग्यै:।
दोषैर्युक्तो दोषैस्तस्माद्यत्नात् परीक्षेत ॥
गिरिकाचशिशुपालौ काचस्फटिकाश्च भूमि-
निर्भिन्ना:।
वैदूर्य्यमणेरेते विजातय: सन्निभा: सन्ति ॥
लिख्याभावात् काचं लघुभावाच्छैशुपालकं
विद्यात्।
गिरिकाचमदीप्तित्वात् स्फटिकं वर्णोज्ज्वलत्वेन ॥
यदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्याकलितस्य मूल्यम्।
तदेव वैदूर्य्यमणे: प्रदिष्टं
पलद्वयोन्मापितगौरवस्य ॥
जातस्य सर्व्वेऽपि मणेस्तु यादृग्-
विजातय: सन्ति समानवर्णा:।
तथापि नानाकरणानुमेय-
भेदप्रकार: परम: प्रदिष्ट: ॥
सुखोपलक्ष्यश्च सदा विचार्य्यो
ह्ययं प्रभेदो विदुषा नरेण।
स्नेहप्रभेदो लघुता मृदुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ॥
कुशलाकुशलै: प्रयुज्यमाना:
प्रतिबद्धा: प्रतियत्नक्रियाप्रयोगै:।
गुणदोषसमुद्भवं लभन्ते
मणयोऽर्थान्तरमूल्यमेव भिन्ना: ॥
क्रमश: समतीतवर्त्तमाना:
प्रतिबद्धा मणिबन्धकेन यत्नात्।
यदि नाम भवन्ति दोषहीना
मणय: षड्गुणमाप्नुवन्ति मूल्यम् ॥
आकरान् समतीतानामुदधेस्तीरसन्निधौ।
मूल्यमेतन्मणीनान्तु न सर्व्वत्र महीतले ॥
सुवर्णो मनुना यस्तु प्रोक्त: षोडशमाषक:।
तस्य सप्ततिमो भाग: संज्ञारूपं करिष्यति ॥
शाणश्चतुर्थभागो माषक: पञ्चकृष्णल:।
पलस्य दशमो भागो धरण: परिकीर्त्तित: ॥
इति मानविधि: प्रोक्तो रत्नानां मूल्यनिश्चये ॥"
इति गारुडे वैदूर्य्यपरीक्षा ७३ अध्याय: ॥ * ॥

अन्यच्च।
"सितञ्च धूम्रसङ्काशमीषत्तृणघृतं भवेत्।
वैदूर्य्यं नाम तद्रत्नं रत्नविद्भिरुदाहृतम् ॥
ब्रह्मक्षत्रियविट्शूद्रजातिभेदाच्चतुर्व्विधम्।
सितनीलो भवेद्विप्र: सितारक्तस्तु बाहुज: ॥
पीतनीलस्तु वैश्य: स्यात् नील एव हि शूद्रक: ॥"

अथ गुणा:।
"मार्ज्जारनयनप्रख्यं रवीनप्रतिमं हि वा।
कलिलं निर्म्मलं शुभ्रं वैदूर्य्यं देवभूषणम् ॥
सुतारं घनमत्यच्छं कलिलं शुभ्रमेव च।
वैदूर्य्याणां समाख्याता एते पञ्च महागुणा: ॥"

तद्यथा,—
"उद्गिरन्निव दीप्तिं योऽसौ सुतार इति गद्यते।
प्रमाणतोऽल्पं गुरु यत् घनमित्यभिधीयते ॥
कलङ्कादिविहीनं तदत्यच्छमिति कीर्त्तितम्।
नखस्पृष्टं कणाकारश्चपलो यत्र दृश्यते ॥
कलिलं नाम तद्राश: सर्व्वसम्पत्तिकारकम्।
विशिष्टाङ्गन्तु वैदूर्य्यं शुभ्रमित्यभिधीयते ॥ * ॥
कर्क्करं कर्कशं त्रास: कलङ्को देह इत्यपि।
एते पञ्च महादोषा वैदूर्य्याणामुदीरिता: ॥
शर्करायुक्तमिव यत् प्रतिभाति च कर्क्करम्।
स्पर्शेऽपि च यत्तज्ज्ञेयं कर्कशं बन्धुनाशनम्।
भिन्नभ्रान्तिकरस्त्रास: स कुर्य्यात् कुलसंक्ष-
यम् ॥
विरुद्धवर्णो यस्याङ्गे कलङ्क: क्षयकारक:।
मलदिग्ध इवाभाति देहो देहविनाशन: ॥
जयति यदि सुवर्णं त्यागहीनो यदा वा
बहुविधमणिहारी भूपतिर्वा यतिर्व्वा।